# 2018

## SANSKRIT

## [ Honours ]

## PAPER – VII

*Full Marks* : 90

*Time* : 4 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

[ NEW SYLLABUS ]

1. अधोलिखितयोः प्रश्नयोर्मध्ये एकतरस्य उत्तरं देयम् — 10

(क) किं नाम व्यसनम् ? तत् कतिविधम् ? विषयेऽस्मिन् मनोराशयः पर्यालोच्यताम् । 1 + 4 + 5

(ख) मनुमतेन दण्डस्वरूपं स्पष्टीक्रियताम् । तस्य प्रणयनविषये किमुक्तं मनुसंहितायाम् । 5 + 5

( Turn Over )

2. देवभाषया देवनागर्या च निम्नलिखितयोः वचनयोः कस्यचिदेकस्य सप्रसङ्गं व्याख्या कार्या — 6

(क) वकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत् ।
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत् ।।

(ख) एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम् ।
कुलं दहति राजाग्नि सपशुद्रव्यसञ्चयम् ।।

3. निम्ननिर्दिष्टेषु यथेच्छं विषयद्वयमधिकृत्य टीका विरचनीयाः — $2\frac{1}{2} \times 2$

शिलोञ्छः, नृदुर्गम्, गुल्मम्, राजदूतः ।

4. अधोलिखितेषु प्रश्नेषु संस्कृतभाषया देवनागर्या च चतुर्णामुत्तरं प्रदेयम् — 1 × 4

(क) केन कथं वा राज्ञः सृष्टिर्विहिता ?

(ख) मनुसंहितायाः कयोश्चित् द्वयोः टीकाकारयोर्नाम उल्लिख्यताम् ।

(ग) दुर्गेषु कस्य श्रेष्ठत्वं मनुना प्रतिपादितम् ?

(घ) अविनयात् विनाशप्राप्तयोर्नृपयोर्द्वयोर्नाम विलिख्यताम् ।

(ङ) सामादीनामुपायचतुष्टयानां राष्ट्राभिवृद्धये कयोः प्रशंसा विहिता ?

(च) कथं बालकः नृपः मनुष्यज्ञानेन नावमन्तव्यः ?

5. अधोलिखितयोः प्रश्नयोर्मध्ये एकस्योत्तरं देयम् — 10

(क) 'चतुष्पाद्व्यवहारोऽयं विवादेषूपदर्शितः' — को नाम व्यवहारः ? तस्य पादानां स्वरूपं सविशदमालोच्यताम् । किं सर्वत्रैव व्यवहारः चतुष्पाद् भवति ? $3 + 6 + 1$

(ख) स्त्रीधनमिति पदेन किं बोध्यते ? तस्य भेदाः प्रदर्श्यन्ताम् । स्त्रीधनस्य उत्तराधिकारविषये याज्ञवल्क्यमतं संक्षेपेण आलोच्यताम् । $2 + 3 + 5$

6. सुरगिरा देवनागर्या च निम्नलिखितयोर्वचनयोः कस्यचिदेकस्य सप्रसङ्गं व्याख्या कार्याः — 6

(क) सर्वेष्वर्थविवादेषु बलवत्युत्तरा क्रिया ।
आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा ।।

(ख) दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते ।
आद्यौ तु वितथे दाप्याावितरस्य सुता अपि ।।

7. निम्नलिखितेषु विषयद्वयमधिकृत्य टीका विरचनीया — $2\frac{1}{2} \times 2$

संसृष्टी, उपनिधिः, स्वहस्तकृतलेख्यम्, वृद्धिः ।

8. सुरभाषया देवनागर्या च अधोलिखितेषु चतुर्णामुत्तरं प्रदेयम् — $1 \times 4$

(क) व्यवहारे कदा प्रत्यभियोगः ग्राह्यो भवति ?

(ख) याज्ञवल्क्यमते ऋणस्य सबन्धकप्रयोगे कीदृशी वृद्धिर्भवति ?

(ग) साक्षी कदा अनृतं वदितुमर्हति ?

(घ) सामान्यार्थसमुत्थाने विभागः कीदृशो भवति ?

(ङ) 'आधि' इत्यनेन किं बोध्यते ?

(च) व्यवहारदर्शनं केन शास्त्रानुसारेण करणीयम् ?

(छ) याज्ञवल्क्यमते को दत्तकपुत्रः ?

9. अधोनिर्दिष्टयोः प्रश्नयोर्मध्ये कस्यचिदेकस्योत्तरं देयम् — 10

(क) 'इन्द्रियजयः' इत्यनेन किं व्यपदिश्यते ? कामादिवशीभूतानां नृपाणां का परिणतिर्भवति कौटिल्यप्रोक्तदृष्टान्तसहयोगेन प्रतिपाद्यताम् । राजर्षीणामाचरणं कीदृशं भवेत् तदर्थशास्त्रोक्त-मार्गेण आलोच्यताम् । 3 + 2 + 5

(ख) विजिगीषुः नृपः किमुपायेन मन्त्ररक्षणं कुर्यात् कथं वा यथार्थमन्त्रणापूर्वकं मन्त्रज्ञानं सम्पादयेत् तत्सर्वं कौटिल्य-मतमनुसृत्य पर्यालोच्यताम् । 5 + 5

10. सुरगिरा देवनागर्या च अधस्तनयोः वचनयोः एकतरस्य सप्रसङ्गं व्याख्या कार्या: — 6

(क) चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन पालितः ।
स्वधर्मकर्माभिरतो वर्तते स्वेषु वर्त्मसु ।।

(ख) पूजितार्थमानाभ्यां राज्ञा राजोपजीविनाम् ।
जानीयुः शौचमित्येताः पञ्च संस्थाः प्रकीर्तिताः ।।

11. निम्नलिखितेषु कयोश्चिद्द्वयोः टीका लेख्या — $2\frac{1}{2} \times 2$

त्रयी, योगक्षेमः, लोकायतम्, सत्री ।

12. संस्कृतभाषया देवनागर्या च निम्नलिखितेषु चतुर्णामुत्तरं प्रदेयम् — $1 \times 4$

(क) औशनसमते विद्या कतिविधा का वा ?

(ख) दण्डस्य प्रणयनाभावे राष्ट्रे का स्थितिर्भवति ?

(ग) पराशरमते के अमात्या भवितुमर्हन्ति ?

(घ) कः कापटिकः ?

(ङ) विविधेषु दूतेषु कः श्रेष्ठः ?

(च) 'आन्वीक्षिकी' इत्यस्य कोऽर्थः कौटिल्येन कथितः ?

13. अधोनिर्दिष्टयोः प्रश्नयोः कस्यचिदेकस्योत्तरं लेख्यम् — 10

(क) 'यद्वै किञ्च मनुरवदत् तद्भेषजम्' — वचनस्यास्य तात्पर्यं निरूप्यताम् । मनुसंहितेति ग्रन्थस्य विषयादिवर्णनपूर्वकं संक्षेपेण विवरणं प्रदीयताम् । 2 + 8

(ख) प्राचीनभारते धर्मशास्त्रप्रोजकरूपेण केषां नामोल्लेखः दृश्यते ? तेषु कः आसीत् अधुनातनकाले सर्वाधिकग्रहणीयः, स्वमतं युक्त्या प्रतिपाद्यताम् । 8 + 2

14. निम्नलिखितेषु प्रश्नेषु पञ्चानामुत्तरं संस्कृतमाश्रित्य देवनागर्या च प्रदेयम् — 1 × 5

(क) 'दायभागः' इति निबन्धः केन विरचितः ?

(ख) 'धर्मसूत्रम्' वेदाङ्गानां कस्मिन् विषये अन्तर्भवति ?

(ग) याज्ञवल्क्यसंहितायाः द्वयोः टीकाकारयोः नामोल्लेखः कार्यः ।

(घ) नारदस्मृतिः किं विषयमाश्रित्य विरचिता ?

(ङ) किमस्ति प्राचीनतमं धर्मसूत्रम् ?

(च) 'श्रुतिः' 'स्मृतिः' इत्येतयोः द्वयोर्मध्ये का बलवती ?